# श्रीकृष्णाष्टकम्

वसुदेवसुतं देवं कंसचाणूरमर्द्दनं ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥१ ॥

अतसीपुष्पसंकाशं हारनूपुरशोभितं ।
रत्नकङ्कणकेयूरं कृष्णं वन्दे जगद्गुरुम् ॥२ ॥

कुटिलालकसंयुक्तं पूर्णचन्द्रनिभाननं ।
विलसत्कुण्डलधरं देवं कृष्णं वन्दे जगद्गुरुम् ॥३ ॥

मन्दारगन्धसंयुक्तं चारुहासं चतुर्भुजं ।
बर्हिपिञ्छावचूडाङ्गं कृष्णं वन्दे जगद्गुरुम् ॥४ ॥

उत्फुल्लपद्मपत्राक्षं नीलजीमूतसन्निभं ।
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ॥५ ॥

रुक्मिणीकेळिसंयुक्तं पीताम्बरसुशोभितं ।
अवाप्ततुलसीगन्धं कृष्णं वन्दे जगद्गुरुम् ॥६ ॥

गोपिकानां कुचद्वन्द्वकुङ्कुमाङ्कितवक्षसं ।
श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् ॥७ ॥

श्रीवत्साङ्कं महोरस्कं वनमालाविराजितं ।
शङ्खचक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् ॥८ ॥

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं स्मरणेन विनश्यति ॥

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇